International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

# आगमानां परिचयम्

**Dr.T.Pavan kumar,**

**Sanskrit Leturer,**

**Sri Chaitanya Junior Collage,**

**Tirupati, cell: 7780781592**

आङ्पूर्वकाद् गत्यर्थकाद् गम्लृधातोः ग्रहवृदृनिश्चिगमश्च **1**। इत्यनेन पाणिनिसूत्रेण आङ् इत्युपसर्गपूर्वक गम् धातोः अच् प्रत्ययात् आगमशब्दः निष्पन्नः।

**आगमः नाम आगम्येते प्रमीयेते हिताहितप्राप्तिपरिहारावनेन आगमः 2**

**आगच्छन्ति बुद्धिमारोहन्ति यस्मादभ्युदयनिःश्रेयसोपायाः स आगमः 3** इति वाचस्पतिमिश्रेण प्रतिपादितं लोककल्याणाय मोक्षप्रदायकाय निर्दिष्टः शास्त्रविशेषः आगम इति।

**आप्तवचनादाविर्भूतः अर्थविशेषसंवेदनरूपः आगमः 4।**

**अमुं ब्रह्माणं गमयतीति आगमः5।**

**आसमन्तात् गम्यन्ते व्युत्पाद्यन्ते अनेनेति 6।** संसारसागरे मज्जनोन्मज्जनस्य जीवजातस्य मोक्षप्राप्त्यर्थम् उपदिष्टं यत् शास्त्रं वर्तते तदेव आगमशास्त्रमिति निष्कर्षः।

**सृष्टिश्च प्रलयश्चैव देवतानां तथाऽर्चनम्।**

**साधनञ्चैव सर्वेषां पुरश्चरणमुच्यते॥**

**षट्कर्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः।**

**सप्तभिर्लक्षणैर्युक्तंत्वागमंतद्विदुर्बुधाः॥** 7 इति।

सृष्टि-प्रलय-देवतार्चन-साधन-मन्त्रपुरश्चरण-वश्याकर्षणविद्वेषणमारणमोहनोच्चाटनेति षट्कर्मणां साधन-चतुर्विधध्यानयोगेति सप्तभिः लक्षणैः युक्तः आगम इति आगमशब्दस्य व्युत्पत्तिः

शब्दवाचस्पत्ये दृश्यते। वेदोपबृंहकग्रन्थराशिरेव आगमशब्देन व्यपदिश्यते इति अस्माभिः निर्णेतुं शक्यते। आगमः तन्त्रमित्यपि प्रथते। तन् धातोः ष्ट्रन् प्रत्ययेन तन्त्रशब्दः निष्पद्यते । तन्त्रं नाम भगवदाराधनोपदेशक ग्रन्थसर्वस्वम् इत्यर्थः।

अचिन्त्य-दिव्य-अद्भुत-दृश्यादृश्य-नित्य-अमल-स्वच्छ-अतीन्द्रिय-सर्वव्यापक-नित्य-विभु-सर्वगत- प्रणवात्मकादिविशेषैः विराजमानस्य परमात्मनः साकारपरिकल्पनाय सर्ववर्णाश्रमजनसाफल्याय ज्ञानसंसाधनाय चाध्यात्मिकग्रन्थसर्वस्वमेव आगममिति दर्शनशास्त्रेषु इदं अद्वितीयं स्थानं वहतीति नास्ति विप्रतिपत्तिः। निराकारस्य भगवतः साकर परिकल्पने उद्दिष्टः साधनग्रन्थसमूहः आगमः भवति । अयं च आगमः देवताभेदेन बहुविधः भवेत् । आगमभेदान् पश्यामः।

**शैवागमाः**

अस्मिन्नागमे परमशिव एव प्रधानाराध्यः। परमशिवस्य अर्चनमेव मोक्षमार्गः। शैवागमाः तावत् परमशिवस्य सद्योजात-अघोर-ईशान-वामदेव-तत्पुरुषेति पञ्चमुखेभ्यः उत्पन्ना भवन्ति। तत्र तावत् सद्योजातमुखात् योगज-कामिक-चिन्त्य-कारण-अजितागमाःअघोरमुखात् विजय-निःश्वास-स्वायम्भुव-अंशुमत्-सुप्रभेदागमाः-ईशानमुखात् प्रोद्गीत-ललित-सिद्ध-सन्तान-सर्वोत्तम-पारमेश्वर-किरण-वातुलागमाः-वामदेवमुखात् दीप्त-सूक्ष्म-अनिल-सहस्र-वीरागमाः तत्पुरुषमुखात् रौरव-मकुट-विमल-चन्द्रज्ञान-बिम्बागमाः समुद्भूता आसन् । सर्वे एते अष्टाविंशतिसंख्याकाः शैवागमग्रन्था इति शैवागमः उपदिशति। शैवागमे ज्ञान-योग-क्रिया-चर्या इति चत्वारः पादास्सन्ति । तत्र ज्ञानपादे परमशिवस्य तत्त्वं प्रकृतेः स्वरूपं जीवात्मविचारः मोक्षस्वरूपम् इत्येते अंशाः उपदिष्टा अभवन्। २१ शैवागमेषु कामिक सुप्रभेदवातुलागमाः

प्रसिद्धाः। काश्मीरे वसुगुप्तस्य शैवसूत्राणि कल्हणस्य स्पन्दकारिका सोमानन्दनाथस्य शिवदृष्टिः उत्पलस्य प्रत्यभिज्ञानसूत्राणि प्रत्यभिज्ञानहृदयग्रन्थाः सिद्धान्तं प्रकाशितम् । काश्मीरागमाः उत्तरभारते पाशुपताद्याः दक्षिणे च प्रचारः दृश्येते **8** ।

**वैखानसागमः**

विखनसमहर्षिणा प्रवर्तितः वैखानसागमः। यास्कः विखनाद् वैखानसमिति वैखानसशब्दार्थः कथितः। विशेषेण खननात् गभीरार्थोद्धरणा- द्विशिष्टवैष्णव-धर्मावधारणौपायिकमीमांसाविशेषणाद्विखनाः।

**नैमिशारण्यमास्थाय मुनिबृन्दनिषेवितम्** ।।

**धाता विखनसो नाम्ना मरीच्यादिसुतां च वै।**

**अनेन ज्ञायते यत् विखनाः ब्रह्मा इति।**

**नारायणः पिता यस्य माता चापि हरिप्रिया।**

**भृग्वादिमुनयः पुत्राः तस्मै विखनसे नमः9 ।।** तत्र

साक्षान्नारायणः विखनसमहर्षेः पिता। पितुः आदेशानुसारं ब्रह्मा विखनसवदवतीर्य नैमिशारण्ये गृहार्चनाप्राधान्येन स्मार्त-धर्म-प्रवर-श्रौतसहितकल्पसूत्रमेकं भृग्वत्रि- मरीचिकश्यपेभ्यः उपदिदेश।विखनश्शब्दार्थः उक्तः। विखनसमुनिः स्वशिष्येभ्यः भगवदाराधनं ज्ञानयोगक्रियाचरिता- त्मकरूपेण उपदिदेश। तत्र तावत् भृगुमहर्षेः अधिकारनाम्ना अत्रिमहर्षिः तन्त्रनाम्ना मरीचिमहर्षिः संहितानाम्ना कश्यपमहर्षिः काण्डनाम्ना वैखानसवाङ्मयमाविष्कृतवन्तः। तस्मिन् वैखानसवाङ्मये मरिचेः विमानार्चनकल्पः आनन्दसंहिता भृगोः क्रियाधिकार-खिलाधिकार-प्रकीर्णाधिकार-यज्ञाधिकार-वासाधिकाराः अत्रेः समूर्तार्चनाधिकरणं, कश्यपमहर्षेः

ज्ञानकाण्डम् इत्येते ग्रन्थाः प्रधानतमाः मुद्रिताश्च भवन्ति। वैखानसकल्पसूत्रानुयायिनः वैखानसाः शास्त्रविहितमार्गे भगवन्तमर्चयामासुः।

**पाञ्चरात्रागमः**

विष्णुपारम्यप्रतिपादकयोः अन्यतमः पाञ्चरात्रगमः साक्षात् अखिलाण्ड कोटि ब्रह्माण्डनायकेन उभयविभूतिनायकेन ज्ञानशक्त्याद्यनन्तकल्याणगुणगणेन श्रीमन्नारायणेनापुनरावृत्तिरूपमोक्षप्राप्त्यर्थं सार्धकोटिश्लोकैर्युतशास्त्रमुपदिश्यते।

**पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्।**

इति महाभारतवचनरीत्या पञ्चरात्रस्य शास्त्रस्य कर्ता तावत् साक्षात् श्रीमन्नारायण इति ज्ञायते। पञ्चायुधांशेभ्यो शाण्डिल्यौपगायनमौञ्जायनकौशिकभारद्वाजेभ्यः एकैकस्यां रात्र्यां एकैकस्मै भगवता वासुदेवेनोपदिष्टं पाञ्चरात्रमिति प्रसिद्धः।

**पञ्चायुधांशास्ते पञ्च शाण्डिल्यश्चौपगायनः।**

**मौञ्ज्यायनः कौशिकश्च भारद्वाजश्च योगिनः।।** इति

पाद्मे सांख्ययोगजैनबौद्धशैवशास्त्राणि पाञ्चरात्रपक्षे अन्धकाराणि भवन्ति, दिवि चन्द्रनक्षत्राणि निष्प्रकाशानि भवेयुरन्यानि शास्त्राणीति एवमर्कमयूखैः नक्षत्राणि न प्रकाशन्ति एव पाञ्चरात्रपक्षे शास्त्रान्तराणि न शोभन्ते इति उच्यते।

**तत्परव्यूहविभवस्वभावादिनिरूपणम्।**

**पाञ्चरात्राह्वयं तन्त्रं मोक्षैकफललक्षणम्।।10 इति**

मोक्षैकफललक्षणे अस्मिन् पाञ्चरात्रतन्त्रे पर-व्यूह-विभव-अन्तर्यामि-अर्चा इति पञ्चनां रूपाणां लक्षणम् उपदिश्यते इति ज्ञायते। तत्र अप्राकृते श्रीवैकुण्ठे परवासुदेव इति

क्षीराब्धौ व्यूहरूपेण विभवावतारेण ब्रह्मादि स्तम्भपर्यन्तेष्वन्तर्यामित्वेन श्रीरङ्गादि क्षेत्रेषु अर्चावतारेण राराजमानत्वात् मोक्षदायकशास्त्रम् इदं पाञ्चरात्रमिति ज्ञायते। इदं पाञ्चरात्रं सार्धकोटिसंख्याश्लोकयुतं भवतीति स्पष्टमुपदिष्टमभूत्।

**सार्धकोटिप्रमाणेन ब्रह्मणा केशवाच्छ्रृतम्।**

**रात्रिभिः पञ्चभिस्सर्वे पाञ्चरात्रागमं स्वयम् ।।**

विष्णवर्चनाप्रतिपादकं पाञ्चरात्रशास्त्रं वैष्णवागमयोः मुख्यत्वं स्थानं प्राप्य दिव्यप्रबन्धेनसाकं दिव्यस्थलेषु आलयेषु राराजमानं भवतीति नैव सन्देहलेशः।

मोक्षसिद्धौ पाञ्चरात्रं प्रधानहेतोः एकायनमिति व्यवहारः। अस्य पाञ्चरात्रस्य मूलभूतः वेदः। परब्रह्मणः नारायणस्याधारेण बलादिमन्त्रैः परंब्रह्म प्राप्तिहेतोः अस्य मूलवेद इति नामन्तरं कथ्यते।

Reference


**1 अष्टाध्यायि ३.३८.१**

**2 महा.भा.छा.व्या पृ.१७**

**3 महा.भा.छा.व्या पृ.१७**

**4 दर्श पृ. १६५**

**5 आगम विमर्श**

**6 आगम विमर्श**

**7 शब्द कल्पद्रुमः (प्रथमभागः) पृ १६५**

**8 आगममीमांसा**

**9 विमानार्चनाकल्पम् .उपो.**

**10 पाद्म संहिता ज्ञानपादः-१.७२-७४**